## Invocation to Lord Ganesa

गजाननं भूतगणाधिसेवितं
कपित्थजम्बूफलसारभक्षितम् ।
उमासुतं शोकविनाशकारणं
नमामि विघ्नेश्वरपादपङ्कजम् ॥

gajānanaṃ bhūtagaṇādhisevitaṃ
kapitthajambūphalasārabhakṣitam .
umāsutaṃ śokavināśakāraṇaṃ
namāmi vighneśvarapādapaṅkajam ..

| | |
|---|---|
| ओं सुमुखाय नमः | oṃ sumukhāya namaḥ |
| ओं एकदन्ताय नमः | oṃ ekadantāya namaḥ |
| ओं कपिलाय नमः | oṃ kapilāya namaḥ |
| ओं गजकर्णकाय नमः | oṃ gajakarṇakāya namaḥ |
| ओं लम्बोदराय नमः | oṃ lambodarāya namaḥ |
| ओं विकटाय नमः | oṃ vikaṭāya namaḥ |
| ओं विघ्नराजाय नमः | oṃ vighnarājāya namaḥ |
| ओं विनायकाय नमः | oṃ vināyakāya namaḥ |
| ओं धूमकेतवे नमः | oṃ dhūmaketave namaḥ |
| ओं गणाध्यक्षाय नमः | oṃ gaṇādhyakṣāya namaḥ |
| ओं फालचन्द्राय नमः | oṃ phālacandrāya namaḥ |
| ओं गजाननाय नमः | oṃ gajānanāya namaḥ |
| ओं वक्रतुण्डाय नमः | oṃ vakratuṇḍāya namaḥ |
| ओं शूर्पकर्णाय नमः | oṃ śūrpakarṇāya namaḥ |
| ओं हेरम्बाय नमः | oṃ herambāya namaḥ |
| ओं स्कन्दपूर्वजाय नमः | oṃ skandapūrvajāya namaḥ |
| ओं श्री सिद्धिविनायक-स्वामिने नमः | oṃ śrī siddhivināyakasvāmine namaḥ |

## Invocation to Lord Dakshinamurti

ओं स्फटिकरजतवर्णां मौक्तिकीमक्षमालां
अमृतकलशविद्यां ज्ञानमुद्रां कराग्रे ।
दधतमुरगकक्षं चन्द्रचूडं त्रिनेत्रं
विधृतविविधभूषं दक्षिणामूर्तिमीडे ॥

oṃ sphaṭikarajatavarṇāṃ mauktikīmakṣamālāṃ
amṛtakalaśavidyāṃ jñānamudrāṃ karāgre .
dadhatamuragakakṣaṃ candracūḍaṃ trinetraṃ
vidhṛtavividhabhūṣaṃ dakṣiṇāmūrtimīḍe ..

ओं नमो भगवते दक्षिणामूर्तये
मह्यं मेधां प्रज्ञां प्रयच्च स्वाहा ॥

oṃ namo bhagavate dakṣiṇāmūrtaye
mahyaṃ medhāṃ prajñāṃ prayacca svāhā ..